# mUrtirahasyam

# મૂર્તિરહસ્યમ્

## Document Information

Text title : mUrtirahasyam

File name : mUrtirahasyam.itx

Category : devii, devI

Location : doc_devii

Proofread by : Pallasena Narayanaswami ppnswami at gmail.com

Description-comments : Brihatstotraratnakara 1, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 211

Source : mArkaNDeyapurANe khilAMshe

Latest update : February 20, 2017

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 13, 2021

*sanskritdocuments.org*

# મૂર્તિરહસ્યમ્

શ્રીગણેશાય નમઃ ॥

ઋષિરુવાચ ॥

નન્દા ભગવતી નામ યા ભવિષ્યતિ નન્દજા ।
સા સ્તુતા પૂજિતા ધ્યાતા વશીકુર્યાજ્જગત્ત્રયમ્ ॥ ૧॥

કનકોત્તમકાન્તિઃ સા સુકાન્તિકનકામ્બરા ।
દેવી કનકવર્ણાભા કનકોત્તમભૂષણા ॥ ૨॥

કનકાઙ્કુશપાશાબ્જૈરલઙ્કૃતચતુર્ભુજા ।
ઇદિરા કમલા લક્ષ્મીઃ સા શ્રીરુક્મામ્બુજાસના ॥ ૩॥

યા રક્તદન્તિકા નામ દેવી પ્રોક્તા મયાનઘ ।
તસ્યાઃ સ્વરૂપં વક્ષ્યામિ શ ૃણુ સર્વભયાપહમ્ ॥ ૪॥

રક્તામ્બરા રક્તવર્ણા રક્તસર્વાઙ્ગભૂષણા ।
રક્તાયુધા રક્તનેત્રા રક્તકેશાતિભીષણા ॥ ૫॥

રક્તતીક્ષ્ણનખા રક્તદશના રક્તદંષ્ટ્રિકા ।
પતિં નારીવાનુરક્તા દેવી ભક્તં ભજેજ્જનમ્ ॥ ૬॥

વસુધેવ વિશાલા સા સુમેરુયુગલસ્તની ॥

દીર્ઘૌ લમ્બાવતિસ્થૂલૌ તાવતીવ મનોહરૌ ॥ ૭॥

કર્કશાવતિકાન્તૌ તૌ સર્વાનન્દપયોનિધી ।
ભક્તાન્સપાયયેદ્દેવી સર્વકામદુઘૌ સ્તનૌ ॥ ૮॥

ખડ્ગપાત્રં ચ મુસલં લાઙ્ગલં ચ બિભર્તિ સા ।
આખ્યાતા રક્તચામુણ્ડા દેવી યોગેશ્વરીતિ ચ ॥ ૯॥

અનયા વ્યાપ્તમખિલં જગત્સ્થાવરજઙ્ગમમ્ ।

ઇમાં યઃ પૂજયેદ્ભક્ત્યા સ વ્યાપ્નોતિ ચરાચરમ્ ॥ ૧૦॥

અધીતે ય ઇમં નિત્યં રક્તદન્ત્યા વપુઃસ્તવમ્ ।
તં સા પરિચરેદ્દેવી પતિં પ્રિયમિવાઙ્ગના ॥ ૧૧॥

શાકમ્ભરી નીલવર્ણા નીલોત્પલવિલોચના ।
ગમ્ભીરનાભિસ્ત્રિવલીવિભૂષિતતનૂદરી ॥ ૧૨॥

સુકર્કશસમોત્તુઙ્ગવૃત્તપીનઘનસ્તની ।
મુષ્ટિં શિલીમુખૈઃ પૂર્ણં કમલં કમલાલયા ॥ ૧૩॥

પુષ્પપલ્લવમૂલાદિફલાઢ્યં શાકસઞ્ચયમ્ ।
કામ્યાનન્તરસૈર્યુક્તં ક્ષુત્તૃણમૃત્યુજરાપહમ્ ॥ ૧૪॥

કાર્મુકં ચ સ્ફુરત્કાન્તિ બિભર્તિ પરમેશ્વરી ।
શાકમ્ભરી શતાક્ષી સ્યાત્ સૈવ દુર્ગા પ્રકીર્તિતા ॥ ૧૫॥

શાકમ્ભરીં સ્તુવન્ધ્યાયન્ જપન્સમ્પૂજયન્નમન્ ।
અક્ષય્યમશ્નુતે શીઘ્રમન્નપાનાદિ સર્વશઃ ॥ ૧૬॥

ભીમાપિ નીલવર્ણા સા દંષ્ટ્રાદશનભાસુરા ।
વિશાલલોચના નારી વૃત્તપીનઘનસ્તની ॥ ૧૭॥

ચન્દ્રહાસં ચ ડમરું શિરઃપાત્રં ચ બિભ્રતી ।
એકવીરા કાલરાત્રિઃ સૈવોક્તા કામદા સ્તુતા ॥ ૧૮॥

તેજોમણ્ડલદુર્ધર્ષા ભ્રામરી ચિત્રકાન્તિભૃત્ ।
ચિત્રભ્રમરસઙ્કાશા મહામારીતિ ગીયતે ॥ ૧૯॥

ઇત્યેતા મૂર્તયો દેવ્યા વ્યાખ્યાતા વસુધાધિપ ।
જગન્માતુશ્ચણ્ડિકાયાઃ કીર્તિતાઃ કામધેનવઃ ॥ ૨૦॥

ઇદં રહસ્યં પરમં ન વાચ્યં યસ્ય કસ્યચિત્ ।
વ્યાખ્યાનં દિવ્યમૂર્તીનામધીષ્વાવહિતઃ સ્વયમ્ ॥ ૨૧॥

દેવ્યા ધ્યાનં તવાખ્યાતં ગુહ્યાદ્ગુહ્યતરં મહત્ ।
તસ્માત્સર્વપ્રયત્નેન સર્વકામફલપ્રદમ્ ॥ ૨૨॥

ઇતિ શ્રીમાર્કણ્ડેયપુરાણે સાવર્ણિકે મન્વન્તરે દેવીમાહાત્મ્યે
મૂર્તિરહસ્યં સમ્પૂર્ણમ્ ॥ અધ્યાય ૧૬

See also prAdhAnikarahasyam and vaikRitikarahasyaM

Proofread by Pallasena Narayanaswami ppnswami at gmail.com

---

*mUrtirahasyam*

pdf was typeset on June 13, 2021

Please send corrections to *sanskrit@cheerful.com*